कत्वं निपातितञ्च ।) मन: । इत्यमर: ।१।४।३१ ॥ (यथा, भट्टि: । ६ । २२ ।
"तस्यालिपत शोकाग्नि: स्वान्तं काष्ठमिव ज्वलन् ।
अलिमेवानिल: शीतो वने तं न त्वजिह्लदत् ॥")
गह्वरम् । इति मेदिनी ॥ (स्वस्य अन्त, पुं, क्ली । यथा, भागवते ।२ । ६ । ३४ ।
"यो ह्यात्ममायाविभवञ्च पर्य्यगाद्
यथा नभ: स्वान्तमथापरे कुत: ॥")
शब्दिते, त्रि ॥

स्वाप:, पुं, (स्वप + घञ् ।) निद्रा । इत्यमर: । १ । ७ । ३६ ॥ (यथा, भागवते ।३।२६।२८।
"संशयोऽथ विपर्य्यासो निश्चय: स्मृतिरेव च ।
स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तित: पृथक् ॥")
शयनम् । स्पर्शाज्ञता । अज्ञानम् । इति विश्व-मेदिन्यौ ॥ (विषयोऽस्य यथा,—
'सर्व्वर्त्तुषु दिवास्वाप: प्रतिसिद्धोऽन्यत्र ग्रीष्मात् ॥"
इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये ॥)

स्वापतेयं, क्ली, (स्वपतौ धनस्वामिनि साधु: । स्वपति + ""पथ्यातिथिवसतिस्वपतेर्ढञ् ।" ४ । ४ । १०४ । इति ढञ् । स्वागतादित्वावेजागम: ।) धनम् । इत्यमर: । २ । ९ । ९० ॥ (यथा, माघे । १४ । ९ ।
"स्वापतेयमधिगम्य धर्म्मत:
पर्य्यपायमवोवृधञ्च यत् ।
तीर्थगामि करवै विधानत-
स्तज्जुषस्व जुहवानि चानले ॥")

स्वापद:, पुं, (श्वापद: । पृषोदरादित्वात् साधु: ।) श्वापद: । इति हलायुध: ॥

स्वाभाविक:, त्रि, (स्वभावे भव: । स्वभाव + ठञ् । स्वभावसिद्ध: । स्वभावत उत्पन्न: । यथा,—
"शैत्यं नाम गुणस्तवैव सहज: स्वभाविको स्वच्छता
किं ब्रूम: शुचितां भवन्ति शुचय: स्पर्शेन यस्यापरे ।
किञ्चान्यत् कथयामि ते स्तुतिपदं त्वं जीविनां जीवनं
त्वञ्चेन्नोचपथेन गच्छसि पय: कस्त्वां निषेद्धुं क्षम: ॥"
इति वल्लालसेनं प्रति लक्ष्मणसेनप्रेरितश्लोक: ॥ (व्याधिप्रकारभेद: । यथा,—
"तद्दुःखसंयोगा व्याधय इत्युच्यन्ते । चतुर्व्विधा: आगन्तवः शारीरा मानसा: स्वाभाविका श्चेति । स्वाभाविका: क्षुत्पिपासाजरामृत्यु-निद्राप्रभृतय: ॥" इति सुश्रुते सूत्रस्थाने प्रथमेऽध्याये ॥)

स्वामिजङ्घी, [न्] पुं, परशुराम: । इति शब्द-माला ॥

स्वामी, [न्] त्रि, (स्वमस्यास्तीति । स्व + "स्वामिन्नैश्वर्य्ये ।" ५ । २ । १२६ । इति आमिन्प्रत्ययेन निपातित: ।) अधिपति: । तत्पर्य्याय: । ईश्वर: २ पति: ३ ईशिता ४ अधिभू: ५ नायक: ६ नेता ७ प्रभु: ८ परिवृढ: ९ अधिप: १० । इत्यमर: । ३ । १ । १० ॥ अवमति: ११ ईश: १२ आर्य्य: १३ । इति जटाधर: ॥ पालक: १४ । इति शब्दरत्नावली ॥

स्वामी, [न्] पुं, (स्वमस्यास्तीति । स्व + आमिन् ।) कार्त्तिकेय: । इति मेदिनी ॥ राजा । यथा,—
"स्वाम्यमात्यः सुहृत् कोषो राष्ट्रदुर्गबलानि च ।
राज्याङ्गानि प्रकृतय: पौराणां श्रेणयोऽपि च ॥"
इत्यमर: । २ । ८ । १७ ॥
विभु: । हर: । हरि: । इति शब्दरत्नावली ॥ गुरु: । भर्त्ता । इति धरणि: ॥ वात्स्यायनमुनि: । इति त्रिकाण्डशेष: ॥ गरुड: । इति केचित् ॥ अतीतकल्पीयार्हद्भेद: । इति हेमचन्द्र: ॥ परम-हंस: । यथा, श्रीधरस्वामिप्रभृतय: ॥ * ॥ स्वाम्यर्थमरणफलं यथा, वह्निपुराणे संग्राम-प्रशंसानामाध्याये ।
"शृङ्गिभिर्दंष्ट्रिभिर्व्वापि तथा म्लेच्छैश्च तस्करै: ।
स्वाम्यर्थे ये हता राजन् तेषां स्वर्गो न संशय: ॥
हते गोस्वामिविप्रार्थे नरमेधफलं हि तत् ॥"
स्वामिप्रशंसा यथा,—
"स्त्रीगर्व्व: पतिसौभाग्याद्वर्द्धते च दिने दिने ।
सुखी चेद्विभवो यस्मात्तं भजेद्धर्मत: सदा ॥
पतिर्बन्धु: कुलस्त्रीणामधिदेव: सदा पति: ।
परं सम्पत्स्वरूपश्च सुखरूपश्च मूर्त्तिमान् ॥
धर्म्मद: सुखद: शश्वत् प्रीतिद: शान्तिद: सदा ।
सम्मानदो मानदश्च मान्यश्च मानखण्डन: ॥
सारात्साररतम: स्वामी बन्धूनां बन्धुदर्शन: ।
न च भर्त्तु: समो बन्धुर्बन्धोर्बन्धुषु दृश्यते ॥
भरणादेव भर्त्तारं पालनात् पतिरुच्यते ।
शरीरेशाच्च स स्वामी कामदात् कान्त उच्यते ।
बन्धुश्च सुखबन्धाच्च प्रीतिदानात् प्रिय: पर: ।
ऐश्वर्य्यदानादीशश्च प्राणेशात् प्राणनाथक: ॥
रतिदानाच्च रमण: प्रियो नास्ति प्रियात् पर: ।
पुत्त्रस्तु स्वामिन: शुक्रात् जायते तेन स प्रिय: ॥
शतपुत्त्रात् पर: स्वामी कुलजानां प्रिय: सदा ।
असत्कुलप्रसूता या कान्तं विज्ञातुमक्षमा ॥
स्नानञ्च सर्व्वतीर्थेषु सर्व्वयज्ञेषु दीक्षणम् ।
प्रादक्षिण्यं पृथिव्याश्च सर्व्वाणि च तपांसि च ॥
सर्व्वाण्येव व्रतानीति महादानानि यानि च ।
उपोषणानि पुण्यानि यान्यन्यानि च विश्वत: ॥
गुरुसेवा विप्रसेवा देवसेवादिकञ्च यत् ।
स्वामिन: पादसेवाया: कलां नार्हन्ति षोड-शीम् ॥
गुरुविप्रेष्टदेवेषु सर्व्वेभ्यश्च पतिर्गुरु: ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे । ४२ । २०—३० ॥

स्वाम्युपकारक:, पुं, (स्वामिन उपकारक: ।) अश्व: । इति केचित् ॥ प्रभुहितकारके, त्रि ॥

स्वायम्भुव:, पुं, (स्वयम्भुवोऽपत्यमिति । स्वयम्भू + अण् । संज्ञापूर्व्वकस्य विधेरनित्यत्वात् न गुण: ।) प्रथममनु: । स च सृष्टिहेतवे ब्रह्मणो दक्षिणाङ्गाज्जात: । वामाङ्गात् शतरूपा स्त्री तस्य महिषी आसीत् । अस्मिन्मन्वन्तरे यज्ञोऽवतार: स एव इन्द्र: । यमादयो देवा: मरीच्यादिसप्तर्षय: । स्वायम्भुवो मनु: । प्रियव्रतोत्तानपादौ मनुपुत्त्रौ । आकूति: देवहूति: प्रसूति: कन्या: । इति श्रीभागवतमतम् ॥ * ॥ अपि च ।
"यामा नाम पुरा देवा: आसन् स्वायम्भुवेऽन्तरे ।
सप्तैव ऋषय: पूर्व्वं ये मरीच्यादय: स्मृता: ॥
अग्निध्रश्चाग्निबाहुश्च विभु: सवन एव च ।
ज्योतिष्मान् द्युतिमान् हव्यो मेधा मेधातिथिर्व्वसु: ॥
स्वायम्भुवस्यास्य मनोर्दशैते वंशवर्द्धना: ।
प्रतिसर्गममी कृत्वा जग्मुस्ते परमं पदम् ॥
एतत् स्वायम्भुवं प्रोक्तं स्वारोचिषमत: परम् ॥"
इति मार्कण्डेये । ९ । ३—६ ॥ * ॥
अपरञ्च ।
"ततो ब्रह्मात्मसंभूतं पूर्व्वं स्वायम्भुवं प्रभु: ।
आत्मन: सदृशं चक्रे प्रजापाल्ये मनुं तदा ॥
शतरूपाञ्च तां नारीं तपोनिर्धूतकल्मषाम् ।
स्वायम्भुवो मनुर्देव: पत्नीत्वे जगृहे प्रभु: ॥
तस्माच्च पुरुषात् पुत्त्री शतरूपा व्यजायत ।
प्रियव्रतोत्तानपादौ प्रख्यातावात्मकर्म्मभि: ॥
कन्ये द्वे च तथाकूति: प्रसूतिश्च तत: पिता ।
ददौ प्रसूतिं दक्षाय तथाकूतिं रुचे: पुरा ॥
प्रजापति: स जगृहे तयोर्यज्ञ: सदक्षिण: ।
पुत्त्रो जज्ञे महाभाग: दम्पत्योर्मिथुनं तत: ॥
यज्ञस्य दक्षिणायास्तु पुत्त्रो द्वादश जज्ञिरे ॥
यामा इति समाख्याता देवा: स्वायम्भुवेऽन्तरे
तस्य पुत्त्रास्तु यज्ञस्य दक्षिणायां सुभास्वरा: ॥
प्रसूत्याञ्च तथा दक्षस्तस्त्रो विंशतिस्तथा ।
ससर्ज कन्यास्तासान्तु सम्यक् नामानि मे शृणु ॥"
इति मार्कण्डेयपुराणे दु:सहशासननामाध्याय: (तत्सम्बन्धिनि, त्रि । यथा, हरिवंशे । ७ । ९ ।
"यामा नाम तथा देवा आसन् स्वायम्भुवेऽन्तरे ॥
ब्रह्मसम्बन्धिनि च त्रि । यथा, कुमारे ।२।१ ।
"तस्मिन् विप्रकृता: काले तारकेण दिवौकस: ।
तुरासाहं पुरोधाय धाम स्वायम्भुवं ययु: ॥")

स्वायम्भुवमनुपिता, [ह] पुं, (स्वयम्भुवमनो: पिता ।) ब्रह्मा । इति पुराणम् ॥

स्वायम्भुवी,) स्त्री, (स्वयम्भुव इयमिति । अण् । ङीप् ।) ब्राह्मी । इति राजनिर्घण्ट: ॥

स्वराट्, [ज्] पुं, (स्व: स्वर्गे राजते इति । राज् + क्विप् ।) इन्द्र: । इत्यमर: । १ । १ । ४६ ॥

स्वारोचिष:, पुं, (स्वरोचिषोऽपत्यमिति । अण् ।) द्वितीयो मनु: । अस्मिन् मन्वन्तरे विभुरवतार: । रोचन इन्द्र: । तुषितादयो देवा: । ऊर्ज्जस्तम्भादय: सप्तर्षय: । अग्निसुत: स्वारोचिषो मनु: । द्युमत्सुषेणरोचिष्मत्प्रमुखा मनुपुत्त्रा: । इति श्रीभागवतमतम् ॥ अपि च ।
"स्वारोचिषस्य तनयाश्चत्वारो देववर्चस: ।